# ॥ શ્રીવિષ્ણુકવચં અથવા બ્રહ્માણ્ડપાવનકવચં બ્રહ્મવૈવર્ત પુરાણાન્તર્ગતમ્ ॥

.. shrIVishnukavacha from Brahmavaivarta Purana ..

sanskritdocuments.org

September 11, 2017

.. shrIVishnukavacha from Brahmavaivarta Purana ..

॥ શ્રીવિષ્ણુકવચં અથવા બ્રહ્માણ્ડપાવનકવચં બ્રહ્મવૈવર્ત પુરાણાન્તર્ગતમ્ ॥

Sanskrit Document Information

Text title : Vishnukavacha from Brahmavaivarta Purana

File name : viShNukavachaBVP.itx

Category : kavacha, vishhnu

Location : doc_vishhnu

Transliterated by : PSA Easwaran psaeaswaran at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : brahmavaivartapurANa brahmakhaNDaM adhyAya 19 shloka 39-54

Latest update : January 25, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

શૌનક ઉવાચ ।
કિં સ્તોત્રં કવચં વિષ્ણોર્મન્ત્રપૂજાવિધિઃ પુરા ।
દત્તો વસિષ્ઠૈસ્તાભ્યાં ચ તં ભવાન્ વક્તુમર્હતિ ॥ ૮॥

દ્વાદશાક્ષરમન્ત્રં ચ શૂલિનઃ કવચાદિકમ્ ।
દત્તં ગન્ધર્વરાજાય વસિષ્ઠેન ચ કિં પુરા ॥ ૯॥

તદપિ બ્રૂહિ હે સૌતે શ્રોતું કૌતૂહલં મમ ।
શઙ્કરસ્તોત્રકવચં મન્ત્રં દુર્ગવિનાશનમ્ ॥ ૧૦॥

સૌતિરુવાચ ।
તુષ્ટાવ યેન સ્તોત્રેણ માલતી પરમેશ્વરમ્ ।
તદેવ સ્તોત્રં દત્તં ચ મન્ત્રં ચ કવચં શૃણુ ॥ ૧૧॥

ઓં નમો ભગવતે રાસમણ્ડલેશાય સ્વાહા ।
ઇમં મન્ત્રં કલ્પતરું પ્રદદૌ ષોડશાક્ષરમ્ ॥ ૧૨॥

પુરા દત્તં કુમારાય બ્રહ્મણા પુષ્કરે હરેઃ ।
પુરા દત્તં ચ કૃષ્ણેન ગોલોકે શઙ્કરાય ચ ॥ ૧૩॥

ધ્યાનં ચ વિષ્ણોર્વેદોક્તં શાશ્વતં સર્વદુર્લભમ્ ।
મૂલેન સર્વં દેયં ચ નૈવેદ્યાદિકમુત્તમમ્ ॥ ૧૪॥

અતીવગુપ્તકવચં પિતુર્વક્ત્રાન્મયા શ્રુતમ્ ।
પિત્રે દત્તં પુરા વિપ્ર ગઙ્ગાયાં શૂલિના ધ્રુવમ્ ॥ ૧૫॥

શૂલિને બ્રહ્મણે દત્તં ગોલોકે રાસમણ્ડલે ।
ધર્માય ગોપીકાન્તેન કૃપયા પરમાદ્ભુતમ્ ॥ ૧૬॥

બ્રહ્મોવાચ ।
રાધાકાન્ત મહાભાગ કવચં યં પ્રકાશિતમ્ ।
બ્રહ્માણ્ડપાવનં નામ કૃપયા કથય પ્રભો ॥ ૧૭॥

માં મહેશં ચ ધર્મં ચ ભક્તં ચ ભક્તવત્સલ ।
ત્વં પ્રસાદેન પુત્રેભ્યો દાસ્યામિ ભક્તિસંયુતઃ ॥ ૧૮॥

શ્રીકૃષ્ણ ઉવાચ ।
શૃણુ વક્ષ્યામિ બ્રહ્મેશ ધર્મદં કવચં પરમ્ ।

અહં દાસ્યામિ યુષ્મભ્યઃ ગોપનીયં સુદુર્લભમ્ ॥ ૧૯॥

યસ્મૈ કસ્મૈ ન દાતવ્યં પ્રાણતુલ્યં મમૈવ હિ ।
યત્તેજો મમ દેહેઽસ્તિ તત્તેજઃ કવચેઽપિ ચ ॥ ૨૦॥

કુરુ સૃષ્ટિમિદં ધૃત્વા ધાતા ત્રિજગતાં ભવ ।
સંહર્તા ભવ હે શમ્ભો મમ તુલ્યો ભવે ભવ ॥ ૨૧॥

હે ધર્મ ત્વમિમં ધૃત્વા ભવ સાક્ષી ચ કર્મણામ્ ।
તપસાં ફલદાતા ચ યૂયં ભવત મદ્વરાત્ ॥ ૨૨॥

બ્રહ્માણ્ડપાવનસ્યાસ્ય કવચસ્ય હરિઃ સ્વયમ્ ।
ઋષિશ્છન્દશ્ચ ગાયત્રી દેવોઽહં જગદીશ્વરઃ ॥ ૨૩॥

ધર્માર્થકામમોક્ષેષુ વિનિયોગઃ પ્રકીર્તિતઃ ।
ત્રિલક્ષવારપઠનાત્ સિદ્ધિદં કવચં વિધે ॥ ૨૪॥

યો ભવેત્ સિદ્ધકવચો મમ તુલ્યો ભવેત્તુ સઃ ।
તેજસા સિદ્ધિયોગેન જ્ઞાનેન વિક્રમેણ ચ ॥ ૨૫॥

પ્રણવો મે શિરઃ પાતુ નમો રાસેશ્વરાય ચ ।
ભાલં પાયાન્નેત્રયુગ્મં નમો રાધેશ્વરાય ચ ॥ ૨૬॥

કૃષ્ણઃ પાયાત્ શ્રોત્રયુગ્મં હે હરે ઘ્રાણમેવ ચ ।
જિહ્વિકાં વહ્નિજાયા તુ કૃષ્ણાયેતિ ચ સર્વતઃ ॥ ૨૭॥

શ્રીકૃષ્ણાય સ્વાહેતિ ચ કણ્ઠં પાતુ ષડક્ષરઃ ।
હ્રીં કૃષ્ણાય નમો વક્ત્રં ક્લીં પૂર્વશ્ચ ભુજદ્વયમ્ ॥ ૨૮॥

નમો ગોપાઙ્ગનેશાય સ્કન્ધાવષ્ટાક્ષરોઽવતુ ।
દન્તપંક્તિમોષ્ઠયુગ્મં નમો ગોપીશ્વરાય ચ ॥ ૨૯॥

ઓં નમો ભગવતે રાસમણ્ડલેશાય સ્વાહા ।
સ્વયં વક્ષસ્થલં પાતુ મન્ત્રોઽયં ષોડશાક્ષરઃ ॥ ૩૦॥

ઐં કૃષ્ણાય સ્વાહેતિ ચ કર્ણયુગ્મં સદાવતુ ।
ઓં વિષ્ણવે સ્વાહેતિ ચ કઙ્કાલં સર્વતોઽવતુ ॥ ૩૧॥

ઓં હરયે નમ ઇતિ પૃષ્ઠં પાદં સદાવતુ ।
ઓં ગોવર્ધનધારિણે સ્વાહા સર્વશરીરકમ્ ॥ ૩૨॥

પ્રાચ્યાં માં પાતુ શ્રીકૃષ્ણઃ આગ્નેય્યાં પાતુ માધવઃ ।
દક્ષિણે પાતુ ગોપીશો નૈરૃત્યાં નન્દનન્દનઃ ॥ ૩૩॥

વારુણ્યાં પાતુ ગોવિન્દો વાયવ્યાં રાધિકેશ્વરઃ ।
ઉત્તરે પાતુ રાસેશ ઐશાન્યામચ્યુતઃ સ્વયમ્ ॥ ૩૪॥

સન્તતં સર્વતઃ પાતુ પરો નારાયણઃ સ્વયમ્ ।
ઇતિ તે કથિતં બ્રહ્મન્ કવચં પરમાદ્ભુતમ્ ॥ ૩૫॥

મમ જીવનતુલ્યં ચ યુષ્મભ્યં દત્તમેવ ચ ।
અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
કલાં નાર્હન્તિ તાન્યેવ કવચસ્યૈવ ધારણાત્ ॥ ૩૬॥

ગુરુમભ્યર્ચ્ય વિધિવદ્વસ્ત્રાલઙ્કારચન્દનૈઃ ।
સ્નાત્વા તં ચ નમસ્કૃત્ય કવચં ધારયેત્ સુધીઃ ॥ ૩૭॥

કવચસ્ય પ્રસાદેન જીવન્મુક્તો ભવેન્નરઃ ।
યદિ સ્યાત્ સિદ્ધકવચો વિષ્ણુરેવ ભવેત્ દ્વિજ ॥ ૩૮॥

ઇતિ શ્રીબ્રહ્મવૈવર્તે મહાપુરુષબ્રહ્માણ્ડપાવનં કવચં સમાપ્તમ્ ॥

brahmavaivartapurANa brahmakhaNDaM adhyAya 19 shloka 8-38

Encoded and proofread by
PSA Easwaran psaeaswaran at gmail.com

.. shrIVishnukavacha from Brahmavaivarta Purana ..
Searchable pdf was typeset using generateactualtext feature of XƎLaTEX 0.99996
on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*